International Journal of Sanskrit Research 2024; 10(5): 68-72

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(5): 68-72
© 2024 IJSR
www.anantaajournal.com
Received: 18-06-2024
Accepted: 21-07-2024

**उमा शर्मा**
आचार्या विभागाध्यक्षा च
संस्कृतविभाग:, एनएएस पीजी कालेज
मेरठ, उत्तर प्रदेश, भारत

**लक्ष्मण सिहं:**
सहायकप्राध्यापक: विभागाध्यक्षश्च
संस्कृतविभाग:, डीपीबीएस कॉलेज
अनूपशहर, बुलंदशहर, उत्तर प्रदेश,
भारत

**Corresponding Author:**
**उमा शर्मा**
आचार्या विभागाध्यक्षा च
संस्कृतविभाग:, एनएएस पीजी कालेज
मेरठ, उत्तर प्रदेश, भारत

# भार्गवीये महाकाव्ये कृदन्त-अनुप्रयोगसमीक्षणम्

**उमा शर्मा, लक्ष्मण सिहं:**

## सारांश:
संस्कृतव्याकरणे कृत्प्रत्ययस्य मुख्यतया कर्मविशेषणानां च क्रियाव्युत्पन्नानां निर्माणेन सह सम्बद्धः भवति । क्रियामूलेषु योजिताः एते प्रत्ययाः संस्कृतसाहित्ये व्याकरणे च बहुप्रयुक्तानां संज्ञाविशेषणानां विविधरूपाणां निर्माणे अत्यावश्यकाः सन्ति । मिथिलाप्रसादत्रिपाठिना प्राचीनसंस्कृतकाव्येभ्य: प्रचुरां प्रेरणां प्राप्य स्वकीयया नवनवोन्मेषशालिन्या प्रतिभया सुग्रथितस्य भार्गवीयमहाकाव्यस्य रचना कृता । काव्यकारेण मिथिलाप्रसादत्रिपाठिना कृदन्तपदानां प्रयोगोऽपि बाहुल्येन विहित:। तिबादिभ्य: भिन्नाः धातुभ्यः विहिताः सर्वे अपि प्रत्ययाः कृत्प्रत्ययाः भवन्ति। येषामन्ते कृत्प्रत्यया: भवन्ति तानि पदानि कृदन्तानि भवन्ति। कृधातो: विहितेन तृच् प्रत्ययेन कर्ता इति सुबन्तपदं निर्मितं भवति । कृत्प्रत्यया: केचन वैदिका: केचन लौकिका: सन्ति। लौकिकेषु अपि केचन सामान्याः प्रत्ययाः केचन विशेषप्रत्ययाः सन्ति । ये प्रत्ययाः सर्वेभ्य धातुभ्य: विहिता: ते सामान्यप्रत्ययाः भवन्ति । ये विशेषधातुभ्य: विहिता: ते विशेषप्रत्ययाः भवन्ति। तृच्, क्त्वा, तुमुन् इत्यादयः सामान्यप्रत्ययाः भवन्ति खश, इकन, क इत्यादय: विशेषप्रत्ययाः भवन्ति ।

**कूट शब्द :** भार्गवीयम्, पूर्वकृदन्त:, उत्तरकृदन्त:, सामान्याप्रत्ययाः, विशेषप्रत्ययाः

## प्रस्तावना
भाषायाः स्वरूपं सर्वदा काठिन्यं जहाति सारल्यं चाधत्ते । यदा भाषा लोकप्रिया सुसम्पन्ना च भवति तदा भाषाविदो भाषागतशब्दान् अपभ्रंशेभ्यो रक्षणाय तां व्याकरणनियमशृङ्खलाबद्धां कुर्वन्ति । अत एव व्याकरणं शब्दानुशासनम् इत्युच्यते । भारतवर्षे पुराकाले बहूनि व्याकरणशास्त्राण्यासन् । परन्तु न तानि परिपूर्णान्यासन्। अतः तेषु न्यूनतां विभावयन् भगवान् पाणिनिरष्टाध्यायीति नाम्ना स्वतन्त्रं शब्दानुशासनं रचयामास । सर्वेषु व्याकरणेषु लोकवेदसाधारणतया मूर्धन्यं पाणिनीयव्याकरणमिति । महामुने: पाणिनेः सदृशो नान्यो वैयाकरणोऽस्मिन् जगति सञ्जातः । व्याकरणशास्त्रीयेतिहासे पाणिनिः युगप्रवर्तकः आचार्य:। तत्प्रणीतस्य व्याकरणशास्त्रस्य विद्वांस: मुक्तकण्ठतया प्रशंसां कुर्वन्ति । किं नाम व्याकरणमिति जिज्ञासायामुच्यते

व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक् क्रियन्ते । सिद्धं साधुपदम् - सुबन्तं तिङन्तं च । 'मुखं व्याकरणं स्मृतम्' इति वेदाङ्गत्वेन व्याकरणस्य अङ्गीकारो दृश्यते । व्याकरणशास्त्रे वर्णानां, शब्दानां च लघुरूपेण निर्देशार्थम् निर्दिष्टासु संज्ञासु अन्यतमा कृत्-संज्ञा अस्ति । येषां कृदन्तपदानां अवबोधनाय पदे-पदे व्याकरणशास्त्रस्य गहनाध्ययनस्य-आवश्यकता अनुभूयते । भार्गवीयमहाकाव्ये अनुप्रयुक्तानां तेषां कृदन्तपदानां विशिष्टमध्ययनं अस्मिन् शोधपत्रे भविष्यति ।

पूर्वकृदन्त-अनुप्रयोगाः:- तेभ्यः तिबादिभ्य: भिन्नाः धातुभ्यः विहिताः सर्वे अपि प्रत्ययाः कृत्प्रत्ययाः भवन्ति। येषामन्ते कृत्प्रत्यया: भवन्ति तानि पदानि कृदन्तानि भवन्ति। सर्वप्रथमं भार्गवीयमहाकाव्ये प्रयुक्तानां कृदन्तानां सामान्या व्यवस्था मनसि स्थापनीया । कृत्प्रत्यया: सामान्येन कर्तरि भवन्ति । करोति इति कर्ता, हरति इति हारकः । इदानीं ये प्रत्ययाः निरूपिताः तेषां विषये संक्षेपेण एकैकशः किञ्चिदत्र प्रस्तूयते। धातो: कर्त्रर्थे ण्वुल् प्रत्यय: भवति[1]। उपासनां य: करोति स: उप-उपसर्गपूर्वकं आस् धातो: ण्वुल् कृते सति उपासक:[2]। बद्रिकारण्ये अखिलै: दानवै: पूजित: शुक्राचार्य: शिवस्य उपासक: अभवत् । तृच् प्रत्ययोऽपि धातो: कर्तृर्थे विधीयते[3]। श्लोकेऽस्मिन् तृच्-अनुप्रयोग: दृष्टव्य:-

न माता मे त्राता भवभयहरो नास्ति जनक:
न पाता मे धाता कनकमणिसारो न शरणम्[4]।।

इगुपधधातुभ्य: ज्ञाप्रीकृधातुभ्य: च कर्त्रर्थे कप्रत्ययो भवति[4]। महर्षि: जमदग्नि: तृतीयं पुत्रं वसुं भवान् **धर्मज्ञ:**,[5] सत्यसन्ध:, गुणैः वरिष्ठः पितु: भक्त: च अस्ति इत्यादिभि: कथनै: संबोध्य जननिमारणकर्महेतो: आज्ञापयति। सुधीवर: पुरोहित: गर्गमुनि: जमदग्नित: धेनुरत्नं पातुं उद्यतं **भूमिपं**[6] कार्तवीर्यं उवाच अस्मिन् संसारे शुभाकांक्षी जन: विप्रवित्तहारणं परित्यजेत् ।

नमामि शूलान्तकरं त्रिशूलिनम् नमामि कालान्तकरं कपालिनम् ।
नमामि संसारहरं सदाशिवम् नमामि शान्तिप्रियमेव शंकरम्[7]।।

चरेर्धातोरधिकरणे सुबन्तोपपदे टप्रत्ययो भवति[8]। रजन्यां रात्रौ चरति अटति भ्रमणं करोति स: रजनी + चर् + ट = रजनीचर: ते रजनीचराः । यदा सपरशुं भार्गवं दृष्ट्वा हतबला: सबलापि रजनीचरा:[9] स्वपुरं वरुणालयं प्रविविशु: तदा दिवं अन्धकाररहितं अभवत् । भृ तॄ वृ जि धारि सहि तपि दम इत्येतेभ्यो धातुभ्यः संज्ञायां विषये खच् प्रत्ययो भवति[10]। धनं जयति सम्पादयति धनं + जि + खच् + मुम् धनञ्जय: तं धनञ्जयम्। महाबली कर्ण: धनञ्जयं[11] स्वबलतोधिकं वीक्ष्य गुरुं द्रोणमुनिं रहस्युपागम्य शस्त्रविधिशिक्षणाय न्यवेदयत् । सर्वेभ्यो सोपपदेभ्यो निरुपपदेभ्यश्च धातुभ्य: क्विप् प्रत्ययो भवति[12]। य: इन्द्रं जितवान् स: इन्द्र + जित् + क्विप् इन्द्रजित्[13]।विदूयमान: इन्द्रजित् राहु: सभां समाहूय राक्षसान् अवोचत् । मन्त्रं वेत्ति जानाति स: मन्त्र + विद् + क्विप् मन्त्रवित् तेषां मन्त्रविदाम्[14]। अयं परशुराम: कश्यपमुने: षडक्षरमन्त्रं समधिगम्य निशिदिनं प्रजप्य मन्त्रविदां वर: जितेन्द्रिय: यति अभवत् । सप्तम्यन्तं उपपदे जनेर्धातो: डप्रत्ययो भवति[15]। त्रयाणां पथां समाहारः गम + ड = गङ्गायाम् । त्रिमार्गगादयोऽप्यत्र गङ्गा त्रिपथगा नाम दिव्या भागीरथीति च । निष्ठासंज्ञकौ क्तक्तवतू प्रत्ययौ धातो: भूतार्थे भवत:[16]। क्तक्तवतूप्रत्यान्तशब्दानां प्रयोग: वाक्येषु भूतकालिकतिङन्तस्य स्थाने क्रियते । क्तक्तवतूप्रत्ययान्तशब्दाः सर्वदा विशेषणत्वेन प्रयुज्यन्ते । य: आश्रयं प्राप्नोति स्वीकरोति शरणागतं भवति स: आ + श्रि + क्त = आश्रित:[17] । या सुरार्थिता रावणादिशमनाय,

---

[1] ण्वुल्तृचौ अष्टाध्यायी 3-1-133
**ध्यात्तव्य**:- अत्र भार्गवीयमहाकाव्ये अष्टाध्याय्या: संदर्भा: संस्कृतभारतीनवदेहलीतः एकोनविंशति–अधिकद्विसहस्रतमे वर्षे प्रकाशितात् पुष्पादीक्षितया संपादितात् अष्टाध्यायीसूत्रपाठात् दत्ताः सन्ति ।
[2] भार्गवीये महाकाव्ये- 06-33
[3] ण्वुल्तृचौ अष्टाध्यायी 3-1-133
[4] इगुपधाज्ञाप्रीकिर: क: अष्टाध्यायी 3-1-135
[5] भार्गवीये महाकाव्ये 15-43
[6] भार्गवीये महाकाव्ये - 19-06
[7] भार्गवीये महाकाव्ये 13-07
[8] चरेष्ट: - अष्टाध्यायी ३.२.१६
[9] भार्गवीये महाकाव्ये- 14-24
[10] संज्ञायां भृतॄवृजिधारिसहितपिदमः अष्टाध्यायी ३२.४.६
[11] भार्गवीये महाकाव्ये- 29-33
[12] क्विप् च- अष्टाध्यायी ३.२.७६
[13] भार्गवीये महाकाव्ये- 13-20
[14] भार्गवीये महाकाव्ये- 12-37
[15] सप्तम्यां जनेर्डः अष्टाध्यायी ३.२.९७
[16] निष्ठा- अष्टाध्यायी ३.२.१०२
[17] भार्गवीये महाकाव्ये- 01-04

मन्थरायाः आश्रिततया चित्रकूटे रामानुजाननगता अपि वरदानबुद्धिः अभवत् सा वाग्देवी सरस्वती मम रसना अग्रसंस्था भवतु । आप् + क्तवतु = आप्तवान् [18] । परस्मैपदिधातुभ्यो वर्तमानकालार्थे शतृप्रत्ययो जायते। वर्तमानार्थे आत्मनेपदिधातुभ्यः शानच्प्रत्ययो भवति [19] । भार्गवीये महाकाव्ये शतृप्रत्ययान्तस्य पुल्लिङ्गे सुष्ठु अनुप्रयोगः अस्मिन् श्लोके-

क्वचिन्मुनिः काष्ठवदास्थितोऽप्सु जपन् स्वपन्
चिन्तयनिष्टदेवम् ।
प्रभुं स्मरन् यो जड़वद् स्थितोऽभूद् वसन् जले
दीर्घतपश्चकार [20]।।

परशुरामतः विदूयमानः इन्द्रजित् राहुः सभां समाहूय राक्षसान् अवोचत् ।

गीयमानाः कलौ रामकीर्तिं प्रियां कीर्त्यमानाः कथां
रामवीर्योद्भवाम्।
मोदमानाः वसन्तश्च दीर्घायुषो राम-विप्राः व्रते कर्शिताः
गर्जिताः [21]।।

**कृत्य-अनुप्रयोगाः-** कृत्सु सप्तप्रत्ययाः पाणिनिना कृत्यसंज्ञकाः कृताः। ते च तव्यत्, तव्य, अनीयर, यत्, ण्यत्, क्यप्, केलिमर चेति। कृत्यप्रत्ययाः अकर्मकेभ्यः धातुभ्यः भावे, सकर्मकेभ्यः कर्मणि भवन्ति [22] । धातोः विध्याद्यर्थेषु भावकर्मणोः तव्यदनीयरौ भवतः [23] । त्वया हसनीयम्, बालकेन उपवेष्टव्यम् ।मया पाठः पठनीयः, तेन देवः वन्दनीयः । पत् + तव्यत् = पतिव्यम्, ज्ञा + तव्यत् = ज्ञातव्यम् । पठ् + अनीयर् = पठनीयम् ।

मान्यो सुतस्य जनको भुवि पूजनीयः सद्दैवतं
तदनुशासनमस्ति पाल्यम् ।
वाक्यानुपालनतयाऽपि च पिण्डदानाद् प्रत्यद्बभोजनतया
तनयत्वमेति [24]।।

अग्रे ये त्रयः कृत्याः विचारिताः ते त्रयोऽपि प्रत्ययाः भावकर्मणोः विहिताः । एतेषु त्रिषु अपि अनुबन्धलोपे कृते य इत्यस्य अवशेषः अनेन एते सरूपप्रत्ययाः । सरूपप्रत्ययेषु वासरूपविधि प्रवर्तते अतः एतेषु कश्चित् एकः एव प्रत्ययः भवति । ण्यति परे 'अचोञ्णिति' इत्यनेन वृद्धिः भवति। यति परे 'पुगन्तलघूपधस्य च' इत्यनेन गुणो भवति। क्यपि तु न कोऽपि विकारः। एकैकस्यापि प्रत्ययस्य सामान्य विवरणम्- **यत्-** अजन्तेभ्यः धातुभ्यः 'अचो यत्' इति यत्प्रत्ययः विधीयते। ज्ञेयम्, चेयम्, द्रव्यम् । अदुपधात् पवर्गान्तात् धातोः यत् भवति। शप् + यत् = शप्यम्, लभ् + यत् = लभ्यम् । **ण्यत्-** ऋकारान्तेभ्यः हलन्तेभ्यश्च धातुभ्यः भवति। स्मार्यं, हार्यम्, धार्यम्। वच + ण्यत् = वाक्यम् । कृ + ण्यत् = कार्यम् कृतिसाध्ये, कर्त्तव्ये । **क्यप्-** कृ + क्यप् + तुक् = कृत्यं । कार्य्यें, कर्त्तव्ये । शास + क्यप् = शिष्यः।
**उत्तरकृदन्त-अनुप्रयोगाः-** क्रियार्थायां क्रियायामुपपदे धातोः भविष्यति काले तुमुन्ण्वुलौ प्रत्ययौ भवतः [25]।

यमासेव्यं ध्यातुं विधिहरमुनीशाः स्तुतिरताः
यमाजप्यं गातुं व्यवसित-पुराणाः सनिगमाः [26]।।

सिद्धावस्थापन्ने धात्वर्थे वाच्ये सर्वेभ्यः धातुभ्यः घञ् प्रत्ययः भवति [27]। घञन्ताः शब्दाः पुंलिङ्गे भवन्ति । उपेत्य अस्मात् अधीयते इति उपाध्यायः। यज + घञ् = यागः। पचादेः धातोः कर्त्रर्थे अच् भवति [28] । सुखं + आ + वह—अच् = सुखावहं सुखमावहति सुखजनके । धातोः स्त्रीलिंगे अकर्तरि कारके संज्ञायां भावे च क्तिन् प्रत्ययः भवति [29]। बुध + क्तिन् = बुद्धिः [30], ज्ञाने । नपुंसकलिंगे भावे धातोः ल्युट् प्रत्ययो भवति [31]। करणे अधिकरणे च कारके धातोः ल्युट् प्रत्ययो भवति [32]। मन् + ल्युट् = मननम्, श्रु + ल्युट् = श्रवणम् [33] । यदि द्वयोः क्रिययोः एकः कर्ता भवति, तदा तत्र क्रिययोः

---

[18] भार्गवीयमहाकाव्ये – 06-12

[19] लटः शतृशानचावप्रथमासमानाधिकरणे अष्टाध्यायी 3-2-124

[20] भार्गवीयमहाकाव्ये – 04-03

[21] भार्गवीये महाकाव्ये- 25-21

[22] तयोरेव कृत्यक्तखलर्थाः अष्टाध्यायी ३.४.७०

[23] तव्यत्तव्यानीयरः अष्टाध्यायी ३.१.९६

[24] भार्गवीये महाकाव्ये-18-35

[25] तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् अष्टाध्यायी ३.३.१०

[26] भार्गवीये महाकाव्ये- 07-35

[27] भावे- अष्टाध्यायी ३.३.१८

[28] नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः - अष्टाध्यायी ३.१.१३४

[29] स्त्रियां क्तिन् - अष्टाध्यायी ३.३.९४

[30] भार्गवीये महाकाव्ये- 01-04

[31] ल्युट् च- अष्टाध्यायी ३.३.११५

[32] करणाधिकरणयोश्च - अष्टाध्यायी ३.३.११७

[33] भार्गवीये महाकाव्ये- 02-42

पूर्वक्रियायाः क्त्वा प्रत्ययः भवति[34]। क्त्वाप्रत्ययान्तं अव्ययपदं भूतकालबोधकं च भवति।

दृष्ट्वा स्वमातरमथो पितरं नभ:स्थं
नत्वाऽब्रवीदहमहो सफलोऽस्मि चाद्य[35]।।

यदि धातोः प्राक् कश्चिदुपसर्गः अस्ति तदा क्त्वाप्रत्ययस्य स्थाने यस्मिन् अर्थे क्त्वाप्रत्ययः तस्मिन् एव अर्थे ल्यबादेशः भवति[36]।

पितामहश्चापि पितामही च ननन्दतु: पौत्रमुखं निरीक्ष्य।
आशीर्भिरालिष्य च वत्सलेन दृष्ट्याभिषेकं
परिचक्रतुस्तौ[37]।।

परि + लभ् + ल्यप् = परिलभ्य,[38] सं + स्मृ + तुक् + ल्यप् = संस्मृत्य[39]। घुसंज्ञकेभ्यो धातुभ्य: उपसर्गोपपदे कर्तृभिन्ने कारके संज्ञायां भावे च किप्रत्ययो भवति। वि + धा + कि = विधि:[40] ब्रह्मणि, भाग्ये, क्रमे व्याकरणोक्ते सूत्रभेदे। कर्मण्युपपदे अधिकरणे कारके घुसंज्ञकेभ्यो धातुभ्य: किप्रत्ययो भवति। वारीणि धीयन्तेऽस्मिन् वारि + धा + कि = वारिधि:[41]।

## उपसंहार:

वयं सर्वेषां तथ्यानां सम्यक् अवलोकनं कृत्वा वक्तुं शक्नुम: यत् यदा भाषा लोकप्रिया सुसम्पन्ना च भवति तदा भाषाविदो भाषागतशब्दान् अपभ्रंशेभ्यो रक्षणाय तां व्याकरणनियमशृङ्खलाबद्धां कुर्वन्ति। व्याक्रियन्ते व्युत्पाद्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक् क्रियन्ते तत् व्याकरणमिति। मिथिलाप्रसादत्रिपाठी चरैवेति चरैवेति इति नियमस्य पालनं कुर्वन् परशुरामकथावर्णनव्याजेन व्याकरणिकपदानां प्रचुरतया अनुप्रयोगं कृतवान्। तिबादिभ्य: भिन्नाः धातुभ्यः विहिताः सर्वे अपि प्रत्ययाः कृत्प्रत्ययाः भवन्ति। येषामन्ते कृत्प्रत्यया: भवन्ति तानि पदानि कृदन्तानि भवन्ति। कृत्प्रत्यया: सामान्येन कर्तरि भवन्ति। धातो: कर्त्रर्थे ण्वुल् प्रत्यय: भवति करोति। उपासनां य: करोति स: **उपासक:**। धर्मं जानाति आचरति स: **धर्मज्ञ** अस्ति। रजन्यां रात्रौ चरति अटति भ्रमणं करोति स: रजनीचर: ते **रजनीचरा:**। धनं जयति सम्पादयति धनञ्जय: तं **धनञ्जयम्**। य: इन्द्रं जितवान् स: **इन्द्रजित्**। मन्त्रं वेत्ति जानाति स: मन्त्रवित् तेषां **मन्त्रविदाम्**। त्रयाणां पथां समाहारः **त्रिपथगा**। द्विर्जायते **द्विज:**। य: आश्रयं प्राप्नोति स्वीकरोति शरणागतं भवति स: **आश्रित:**। आप् + क्तवतु = **आप्तवान्**। परस्मैपदिधातुभ्यो वर्तमानकालार्थे शतृप्रत्ययो, आत्मनेपदिधातुभ्यः शानच्प्रत्ययो भवति। शतृप्रत्ययान्तस्य पुल्लिङ्गे सुष्ठु अनुप्रयोग:-

वने भ्रमन्ती मुदमावहन्ती लतासु वृक्षेषु विनोदयन्ती।
विलोकयन्ती सखिभिर्वृता सा ददर्श वल्मीकगतं प्रकाशम्
।।

सेव् + मुक् + शानच् = **सेवमान:**, शी + शानच् = **शयानं**। कृत्सु तव्यत्, तव्य, अनीयर, यत्, ण्यत्, क्यप्, केलिमर चेति सप्तप्रत्यया: पाणिनिना कृत्यसंज्ञका: कृताः। मया पाठ: **पठनीयः**, ज्ञा + तव्यत् = **ज्ञातव्यम्**। कृत्सु **यत्, ण्यत्, क्यप्** एते त्रय: सरूपप्रत्ययाः। सरूपप्रत्ययेषु वासरूपविधि प्रवर्तते अत: एतेषु कश्चित् एकः एव प्रत्ययः भवति। हृ + तुमुन् = **हर्तुम्,** दा + तुमुन् = **दातुम्**। सिद्धावस्थापन्ने धात्वर्थे वाच्ये उपेत्य अस्मात् अधीयते इति **उपाध्याय:**। यज + घञ् = **याग:**। धातो: स्त्रीलिंगे अकर्तरि कारके संज्ञायां भावे बुध + क्तिन् = **बुद्धि:,** ज्ञाने। नपुंसकलिंगे भावे धातो: ल्युट् प्रत्ययो मन् + ल्युट् = **मननम्,श्रवणम्**। यत्र द्वयोः क्रिययोः एकः कर्ता तत्र क्रिययोः पूर्वक्रियायाः क्त्वाप्रत्ययः, यदि धातोः प्राक् कश्चिदुपसर्गः अस्ति तदा क्त्वाप्रत्ययस्य स्थाने ल्यबादेशः भवति। स्मृ + क्त्वा = **स्मृत्वा**, सं + स्मृ + तुक् + ल्यप् = **संस्मृत्य।** घुसंज्ञकात् धाधातो: उपसर्गोपपदे कर्तृभिन्ने कारके संज्ञायां वि + धा+कि= **विधि:**। एवं कृद्वृत्तिः, तद्धितवृत्तिः, समासवृत्तिः, एकशेषवृत्तिः, सनाद्यन्तधातुवृत्तिः चेति पञ्चभिः वृत्तिभिः सर्वः अपि सुबन्तसमूहः व्युत्पाद्यते। भार्गवीयमहाकाव्ये भृगुवंशवर्णनव्याजेन कविना व्याकरणसम्मतानां कृदन्तानां बाहुल्येन अनुप्रयोग: विहित: ये काव्यपथिकस्य कृते व्याकरणज्ञानेन सह उचितार्थावगमलक्ष्याधिगमे सहायका: भवन्ति।

## संदर्भ सूची


1. भार्गवीयम्, प्रो मिथिलाप्रसादत्रिपाठी, न्यू भारतीय बुक कारपोरेशन, दिल्ली, 2008


[34] समानकर्तृकयोः पूर्वकाले अष्टाध्यायी ३.४.२१

[35] भार्गवीये महाकाव्ये- 23-22

[36] समासेऽनञ्पूर्वे क्त्वा ल्यप् अष्टाध्यायी ७.१.३७

[37] भार्गवीये महाकाव्ये- 17-07

[38] भार्गवीये महाकाव्ये- 01-02

[39] भार्गवीये महाकाव्ये- 02-02

[40] भार्गवीये महाकाव्ये- 01-36

[41] भार्गवीये महाकाव्ये- 26-06

2. अष्टाध्यायी पाणिनि: 600 BC
3. महाभाष्यम् पतञ्जलिः 150 BC
4. सिद्धान्तकौमुदी भट्टोजीदीक्षितः 1550-1600
5. संस्कृत व्याकरण की रूपरेखा, डा. यज्ञवीर, ईस्टर्न बुक लिंकर्स 1982.
6. तत्वबोधिनी ज्ञानेन्द्रसरस्वती 1600
7. लघुशब्देन्दुशेखरः नागेशः 1700
8. लघुसिद्धान्तकौमुदी वरदराजः 1700
9. बालमनोरमा वासुदेवदीक्षितः 1800
10. प्रदीपः कैयटः 1000
11. शब्दकौस्तुभः भट्टोजीदीक्षितः 1550-1600
12. रूपावतारः धर्मकीर्तिः 1200.
13. प्रक्रियाकौमुदी रामचन्द्रः 1500
14. प्रक्रियासर्वस्वम् नारायणभट्टः 1500.
15. वाक्यपदीयम् भर्तृहरिः 400.